# आदर्शसंस्कृतप्रश्नपत्रम् 2
# संस्कृतम् (ऐच्छिकम्)
# कोड संख्या 022
# Sanskrit (Elective)

अवधिः होरात्रयम् — पूर्णाङ्काः 100

समय : तीन घण्टे — पूर्णाङ्क : 100

Time : 3 Hours — Maximum Marks : 100

निर्देशाः

सर्वे प्रश्नाः संस्कृतेनैव उत्तरणीयाः।
सभी प्रश्नों के उत्तर संस्कृत में ही लिखें।
**Answers should be written in Sanskrit only.**

उत्तराणि पृथक् दत्तायाम् उत्तरपुस्तिकायाम् एव लेखनीयानि।
सभी उत्तर अलग दी गई उत्तर पुस्तिका में ही लिखें।
**Answers should be written in the separately provided answer-sheet only.**

अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।
इस प्रश्न पत्र में चार खण्ड हैं।
**There are four sections in this question paper.** 15 अङ्काः

खण्डः क अपठितांश–अवबोधनम्
**section A (Unseen Reading comprehension)**

खण्डः ख रचनात्मकलेखनम् 20 अङ्काः
**Section B (Writing Skill)**

खण्डः ग पठितांश–अवबोधनम् 45 अङ्काः
**Section C Reading comprehension**

खण्डः घ छन्दोऽलङ्काराः 20 अङ्काः
**Section D (Meters and figures of speech)**

## खण्डः क Section A
## अपठितांश – अवबोधनम्
## (अपठितांश – अवबोधन)
## Unseen Reading Comprehension

**5+10=15**

1 **अधोलिखितम् अनुच्छेदद्वयं पठित्वा प्रश्नान् संस्कृतेन उत्तरत**
**अधोलिखित दोनों अनुच्छेदों को पढ़कर प्रश्नों के उत्तर संस्कृत में लिखें।**
**Read the following two passages and answer the questions in Sanskrit**

क **प्रथमः अनुच्छेदः**

एकदा सायङ्काले छाया मनुष्यम् अपृच्छत्, "अये! "कथं त्वम् आकारे तथैव तिष्ठसि, पश्य अहं तु प्रतिक्षणं सुदीर्घां भवामि इति।" मनुष्यः अवदत्, सत्यम् उक्तम्। भगिनि! सत्ये असत्ये वास्तविके काल्पनिके एष एव भेदः। सत्यं यथावत् तिष्ठति असत्यं यथासमयं प्रतिक्षणं परिवर्तते। यः सत्यं वदति, सः निर्भयो भूत्वा तदेव वक्ति, असत्यवादी क्षणे क्षणे स्वकथने परिवर्तनं करोति। तेन मनः उद्विग्नं भवति। अतः उच्यते–सत्ये धर्मः प्रतिष्ठितः।

**प्रश्नाः**

**I. एकपदेन उत्तरत**
**एक शब्द में उत्तर दीजिए।**
**Answer in one word only.** (1½×2=1)

(i) कः क्षणे क्षणे परिवर्तितं कथनं वदति?
(ii) धर्मः कुत्र प्रतिष्ठितः?

**II. पूर्णवाक्येन उत्तरत** (1×2=2)
**पूर्णवाक्य में उत्तर दीजिए।**
**Answer in a complete sentence**

सत्ये असत्ये कः भेदः?

**III. यथानिर्देशम् उत्तरत**
**यथानिर्देश उत्तर दीजिए।** (½×4=2)
**Do as directed.**

(i) भगिनि! इति सम्बोधनं कस्यै प्रयुक्तम्?
(ii) 'वास्तविके' इत्यस्य किं विलोमपदमत्र प्रयुक्तम्?
(iii) समयानुसारम् इति अर्थे किं पदमत्र प्रयुक्तम्?
(iv) 'अपृच्छत्' इति क्रियापदस्य कर्तृपदं किम्?

**ख. द्वितीयः अनुच्छेदः** (10)

एकः भवननिर्माता बहूनि वर्षाणि सर्वकारीयभवनानां निर्माणम् अकरोत्। सेवानिवृत्तिसमयः आगतः। तस्य स्वामी अवदत्, ''एकम् अन्यं गृहनिर्माणं करोतु भवान्। एतत् एव अन्तिमं कार्यम् इति। सोऽचिन्तयत् अहं तु षण्मासानन्तरं सेवानिवृत्तः भविष्यामि। अतः स निर्माणे निकृष्टतरां सामग्रीं योजितवान्। काष्ठमपि निम्नश्रेण्याः आसीत्। बालुकायाः अधिकाधिकं प्रयोगम् अकरोत्। उपरि प्रदर्शनार्थं सुन्दरं लेपनम् कारितवान्।

तस्य मनसि विचारः उद्भूतः, ''यदि भवनं वर्षान्तरे एव पतति? पुनः दुष्टभावना प्रबला अभवत्। तेन मम का हानिः? अहं तु सेवानिवृत्तः तावत् भविष्यामि इति। कार्यं समाप्य स भवननिर्माता स्वामिनम् उपगम्य भवनकुञ्जिकां समर्पितवान्। प्रहृष्टः स्वामी अवदत्,'' इदं गृहं तु, त्वदीयम् एव। सेवानिवृत्तिकाले इदम् एव तव मानधनम्। भवननिर्माता आकाशात् पतितः इव पश्चात्तापेन शिरः अताडयत्।

अतः अस्माभिः पूर्णकर्तव्यनिष्ठया कार्यं करणीयम्, तेन एव राष्ट्रस्य प्रगतिः भविष्यति। यथा कर्म तथा फलम्।

**प्रश्नाः**

**I. एकपदेन उत्तरत**

**एक शब्द में उत्तर दीजिए।** (½×4=2)

**Answer in one word only**

(i) भवननिर्माता भवननिर्माणे कीदृशीं सामग्रीं योजितवान्?
(ii) कार्यं समाप्य भवननिर्माता कम् उपागच्छत्?
(iii) भवननिर्माता बहूनि वर्षाणि केषां निर्माणम् अकरोत्?
(iv) उपरि प्रदर्शनार्थं भवननिर्माता कीदृशं लेपनं कारितवान्?

**II. पूर्णवाक्येन उत्तरत** (2)

**पूर्णवाक्य में उत्तर दीजिए।**

**Answer in a complete sentence**

(i) भवनस्य पूर्णतां ज्ञात्वा स्वामी भवन–निर्मातारं किम् अवदत्?
(ii) भवननिर्माता किमर्थं शिरः अताडयत्?

**III. यथानिर्देशम् उत्तरत** (4)

**यथा निर्देश उत्तर दीजिए।**

**Do as directed**

(i) 'करोतु' इति क्रियापदस्य कर्ता कः?
(ii) 'अधिकाधिकम्' इति पदं कस्य विशेषणम्?
(iii) 'प्रकटितः' इति स्थाने किं पदम् अत्र प्रयुक्तम्?
(iv) 'इदम्' इति सर्वनामपदं कस्मै प्रयुक्तम्?

**IV.** **अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत** (2)

**इस अनुच्छेद के लिए समुचित शीर्षक लिखिए।**

**Write a suitable title for this paragraph.**

## खण्डः ख (Section B)

## रचनात्मकलेखनम् 20

## रचनात्मकलेखन

## Writing Skill

**2.** **अधोलिखितां रूपरेखां पठित्वा कथां पुनः उत्तरपुस्तिकायां दशवाक्येषु लिखत**

**निम्नलिखित रूपरेखा को पढ़कर कहानी को पुनः उत्तरपुस्तिका में दस वाक्यों में लिखिए।**

**Read the following outline and rewrite the story in answer-copy in ten sentences only.** (1×10=10)

स्वामी रामतीर्थः – अमेरिकादेशेप्रवचनं, एका अमेरिकन– महिला, आभूषणानां स्वामिनः चरणयोः स्थापनं, रुदनं, पुत्रः मृतः, जीवितं करोतु, प्रार्थना, त्वम् योगी, कर्तुं सक्षमः, आम् कर्तुं सक्षमः, बहुमूल्यं दातव्यम्, ददामि। पश्य तं निर्धनं नीग्रोबालकम्। तं नीत्वा पुत्रवत् पालय। महिला–दुष्करम् एतत्, स्वामी–तव प्रश्नः अपि तथैव। महिला तं बालकं गृहं नयति, पुत्रवत्, भारतीयसंस्कृत्याः सन्देशः, वसुधैव कुटुम्बकम्।

**3.** **पूर्णिमायाम् रात्रौ गगनस्य सौन्दर्यम् इति विषयम् अधिकृत्य प्रदत्तशब्दानां सहायतया दश वाक्यानि लिखत**

**पूर्णिमा की रात्रि में 'आकाश का सौन्दर्य' विषय पर दिए गए शब्दों की सहायता से दस वाक्य लिखिए।**

**Write ten sentences on the beauty of sky at full moon night with the help of given words.** (1×10=10)

**मञ्जूषा**

| |
|---|
| पूर्णः चन्द्रः, सर्वत्र अमृतवर्षणम्, असंख्यानि तारकाणि, ध्रुवतारकं तीव्रप्रकाशपूर्णम्, सप्तर्षिमण्डलम्, तारकाणि पुष्पाणि इव, चन्द्रः अमृतकलशः इव, चन्द्रस्य किरणाः शीतलाः, केचन जनाः नौकाविहारं, गगनस्य सौन्दर्यं पश्यन्ति, सर्वत्र शान्तिः, विकसन्ति, विराजन्ते, द्योतन्ते, प्राचीनकाले कौमुदीमहोत्सवस्य आयोजनम्। मेघानाम् आच्छादनात् दृश्यं, सर्वत्र कृष्णाः मेघाः |

## खण्डः ग (Section C)

## पठित–अवबोधनम् **45**

## Text Book Comprehension

5. **अधोलिखितं गद्यांशं पद्यांशं, नाट्यांशं च पठित्वा तदाधारितान् प्रश्नान् उत्तरपुस्तिकायाम् उत्तरत** **15**

**निम्नलिखित गद्यांश, पद्यांश तथा नाट्यांश को पढ़कर प्रश्नों के उत्तर दीजिए।**

**Read the following extracts from prose, poetry and drama and answer the questions**

**अ. गद्यांशः** (5)

एवं सकलगुणनिवासः स विक्रमो राजा एकदा मनस्यचिन्तयत् अहो असारोऽयं संसारः, कदा कस्य किं भविष्यति इति न ज्ञायते। यत् च उपार्जितानां वित्तं तदपि दानभोगैर्विना सफलं न भवति। तथा चोक्तम्

उपार्जितानां वित्तानां त्याग एव हि रक्षणम्।
तटाकोदरसंस्थानां परीवाह इवाम्भसाम्।।

**प्रश्नाः**

I **एकपदेन उत्तरत**

**एक शब्द में उत्तर दीजिए।** (½×2=1)

**Answer in one word only**

(i) उपार्जितानां वित्तानां कः रक्षकः?

(ii) अयं संसारः कीदृशः?

II **पूर्णवाक्येन उत्तरत**

**पूर्णवाक्य में उत्तर दीजिए।**

**Answer in a complete sentence** (1×2=2)

(i) वित्तं कैः विना सफलं न भवति?

(ii) तडागे स्थितानां जलानां रक्षकः कः?

III **यथानिर्देशम् उत्तरत** (½×4=2)

**यथानिर्देश उत्तर दीजिए।**

**Do as directed**

(i) सकलगुणनिवासः इति पदं कस्य विशेषणम्?

(ii) अचिन्तयत् इति पदस्य किं कर्तृपदम्?

(iii) 'जलानाम्' इत्यर्थे किं पदमत्र प्रयुक्तम्?

(iv) परीवाह इवाम्भसाम् इति वाक्यांशे किम् अव्ययपदम्?

**आ. पद्यांशः**

विपदि धैर्यमथाभ्युदये क्षमा,
सदसि वाक्पटुता युधि विक्रमः।
यशसि चाभिरुचिर्व्यसनं श्रुतौ,
प्रकृतिसिद्धमिदं हि महात्मनाम्।।

**प्रश्नाः**

**I एकपदेन उत्तरत** (1/2×2=1)
**एक शब्द में उत्तर दीजिए।**
**Answer in one word only**

(i) सभायां किम् अपेक्षितम्?
(ii) महात्मनाम् अभिरुचिः कस्मिन् भवति?

**II पूर्णवाक्येन उत्तरत**
**पूर्णवाक्य में उत्तर दीजिए।**
**Answer in a complete sentence** (1×2=2)

महात्मनां विपत्तौ अभिवृद्धौ च किं किं प्रकृतिसिद्धं भवति?

**III यथानिर्देशं कुरुत**
**निर्देशानुसार कीजिए।** (1/2×4=2)
**Do as directed**

(i) 'वेदे' इति स्थाने किं पदमत्र प्रयुक्तम्?
(ii) प्रथमपंक्त्यां किम् अव्ययपदम्?
(iii) 'दुरात्मनाम् इति पदस्य किं विलोमपदमत्र प्रयुक्तम्?
(iv) 'युद्धे' इति अर्थे किं पदमत्र प्रयुक्तम्?

**IV नाट्यांशः**

लवः (प्रविश्य, स्वगतम्) अविज्ञातवयः क्रमौचित्यात् पूज्यानपि सतः कथमभिवादयिष्ये (विचिन्त्य) अयं पुनरविरुद्धप्रकार इति वृद्धेभ्यः श्रूयते। (सविनयमपुसृत्य) एष वो लवस्य शिरसा प्रणामपर्यायः।

अरुन्धतीजनकौ कल्याणिन्। आयुष्मान् भूयाः।

कौसल्या जात! चिरंजीव।

अरुन्धती एहि वत्स! (लवमुत्सङ्गे गृहीत्वा आत्मगतम्) दिष्ट्या न केवलमुत्सङ्गश्चिरान्मनोरथोऽपि मे पूरितः।

कौसल्या जात! इतोऽपि तावदेहि। (उत्सङ्गे गृहीत्वा) अहो, न केवलं मांसलोज्ज्वलेन देहबन्धेन, कलहंसघोषघर्घरानुनादिना स्वरेण च रामभद्रम् अनुसरति।

**प्रश्नाः**

**I** **एकपदेन उत्तरत** (½×2=1)

**एक शब्द में उत्तर दीजिए।**

**Answer in one word only**

(i) लवः स्वरेण कम् अनुसरति?

(ii) जात! चिरं जीव इति आशीर्वादं का प्रयच्छति?

**II** **पूर्णवाक्येन उत्तरत** (1×2=2)

**पूर्णवाक्य में उत्तर दीजिए।**

**Answer in a complete sentence**

(i) लवम् उत्सङ्गे गृहीत्वा कस्याः मनोरथः पूरितः जातः?

(ii) लवः क्रमौचित्यम् अजानन् पूज्यान् सविनयम् उपसृत्य कथम् अभिवादयति?

**III** **यथानिर्देश कुरुत** (½×4=2)

**यथानिर्देश कीजिए।**

**Do as directed**

(i) 'आत्मगतम्' इत्यस्य किं समानपदम् अस्मिन् नाट्यांशे प्रयुक्तम्?

(ii) 'मांसलोज्ज्वलेन इति कस्य विशेषणम्?

(iii) जात! इति सम्बोधनं कस्मै प्रयुक्तम्?

(iv) 'अचिरात्' इति अस्य किं विलोमपदम् अत्र प्रयुक्तम्?

**6.** **शब्दार्थान् मेलयत** (1/2×4=2)

**शब्दों का अर्थों से मिलान कीजिए।**

**Match the words with their meanings**

| **शब्दाः** | | **अर्थाः** |
|---|---|---|
| अ | निसर्गतः | (i) पात्राणि |
| आ | अभिजातम् | (ii) वृद्धावस्था |
| इ | भाजनानि | (iii) कुलीनम् |
| ई | जरा | (iv) स्वभावतः |

**7.** **स्थूलपदानि आधृत्य प्रश्ननिर्माणं कुरुत** (1×4=4)

**स्थूल शब्दों पर आधारित प्रश्न निर्माण कीजिए।**

**Frame questions based on the bold-lettered words.**

(i) अथ **पृथिव्याः** विभागनिरूपणम्।

(ii) सप्तग्रहाः **स्वर्गं** परितो मेखलावत् परिभ्रमन्ति।

(iii) एतेषां **सप्तद्वीपानां** प्रत्येकमावेष्टनरूपाः सप्तसमुद्राः।

(iv) **पौराणिकास्तु** सप्त द्वीपानि वदन्ति।

**8.** **अधोलिखितयोः पद्ययोः भावार्थयोः रिक्तस्थानपूर्तिं मञ्जूषादत्तपदैः कुरुत** (3+3=6)
**निम्नलिखित दोनों पद्यों के भावार्थों में रिक्तस्थानों की पूर्त्ति मञ्जूषा में दिए गए पदों से कीजिए।**
**Fill in the blanks in the following explanations of the two verses with the words given in the box.**

I असूर्या नाम ते लोकाः अन्धेन तमसावृताः।
तॉंस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः।।

II तदेजति तन्नेजति, तद् दूरे तद्वन्तिके।
तदन्तः सर्वलोकस्य, तद्धि बहिः प्रतिष्ठितः।।

**भावार्थः**

I ये नराः (i)...............हत्यां कुर्वन्ति, आत्मपतनस्य (ii)....................अनुसरन्ति, ते (iii)..............
उपरान्तम् (iv)---------------परिपूर्णेषु (v)---------------युक्तेषु लोकेषु (vi)------------

II सः चलति, सः न (i)................,सः (ii)................दूरे अपि अस्ति (iii)..............अपि अस्ति,
स एव (iv).........सर्वस्य (v).........विद्यमानः अस्ति, सः अस्मात् जगतः (vi)..........अपि अस्ति।

**मञ्जूषा**

| |
|---|
| मार्गम्, आसुरीभावैः, चलति, अन्तः, आत्मनः, मृत्योः, इन्द्रियेभ्यः, अस्य, बहिः अन्धकारेण, पतन्ति, समीपे, |

**9.** **अधोलिखितयोः अन्वययोः रिक्तस्थानानि पूरयत** (1½+½=3)
**निम्नलिखित अन्वयों में रिक्तस्थानों की पूर्ति कीजिए।**
**Fill in the blanks in the following prose-order-renderings.**

I तमध्वरे विश्वजिति क्षितीशं,
निःशेषविश्राणितकोषजातम्!,
उपात्तविद्यो गुरुदक्षिणार्थी,
कौत्सः प्रपेदे वरतन्तुशिष्यः।।

**अन्वयः** वरतन्तुशिष्यः कौत्सः (i)............... गुरुदक्षिणार्थी विश्वजिति (ii)...............
निःशेषविश्राणितकोषजातं तं क्षितीशं (iii)................ ।

II सर्वत्र नो वार्तमवेहि राजन्।
नाथे कुतस्त्वय्यशुभं प्रजानाम्।
सूर्ये तपत्यावरणाय दृष्टेः
कल्पेत लोकस्य कथं तमिस्रा।।

**अन्वयः** राजन्! सर्वत्र नः वार्तम् (i)................। त्वयि नाथे प्रजानाम् (ii)................कुतः?
सूर्ये तपति तमिस्रा लोकस्य (iii)................आवरणाय कथं कल्पेत।

10 **अधोलिखिताः पंक्तयः कस्य कवेः कस्मात् काव्यात् सङ्कलिताः?** (½×10=5)

**निम्नलिखित पंक्तियाँ किस कवि के किस काव्य से ली गई हैं?**

**From which work of which poet have the following lines been extracted?**

(i) न हि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत्।

(ii) एकः सायं समयप्रयुक्तः स्वभाववृत्तोऽन्धकारः स च द्विगुणितो मेघमालाभिः।

(iii) स्वकार्यं त्यक्त्वा अपरस्य सहकारस्तस्य धर्मः।

(iv) अमङ्गलमिव उपघ्नन्ति विश्वासम्।

(v) प्राचीनमर्यादाऽपि तु रक्षितव्या स्यात्।

11 **यथानिर्देशं कुरुत** (2×5=10)

**यथानिर्देश कीजिए।**

**Do as directed**

**I कर्तृपदं क्रियापदं च चिनुत** (½×4=2)

(i) क्षणे क्षणे हयस्य खुराश्चिक्कणपाषाणखण्डेषु प्रस्खलन्ति।

(ii) कलविङ्काश्चाटकैर–रुतैः परिपूर्णेषु नीडेषु प्रतिनिवर्तन्ते।

**II विशेषणविशेष्यपदं चिनुत** (½×4=2)

(i) अस्य किन्तोः कारणात् कस्मिन्नपि कार्ये सफलता न अस्ति।

(ii) अहं निश्चिन्तताया एकं निःश्वासम् अमुचम्।

**III रेखाङ्कितं सर्वनामपदं कस्मै प्रयुक्तम्?** (1×2=2)

(i) तात चन्द्रापीड! अधीतसर्वशास्त्रस्य **ते** नाल्पमपि उपदेष्टव्यम् अस्ति।

(ii) विशेषेण तु राज्ञाम्। विरला हि **तेषाम्** उपदेष्टारः।

**IV प्रदत्तशब्दयोः समानार्थकपदं चिनुत** (1×2=2)

(i) **पिप्पलः** – सर्वविधविटपिनाम् मध्यभागे स्थितः सुमहान् अश्वत्थदेवः वदति।

(ii) **बुभुक्षाशान्तिः** – श्वापदानां हिंसाकर्म किल जठरानलनिर्वाणमात्रप्रयोजकम्।

**V कः कं कथयति?** 1/2×4=2

(i) मम दायित्वहस्तान्तरणपत्रकं सज्जीकुरु।

(ii) भगवान् यीशुस्तव मङ्गलं वितनोतु।।

## खण्डः घ

## Section D

## छन्दोऽलङ्काराः

## Meters and Figures of Speech

**10+10=20**

12 **I.** **प्रश्नान् उत्तरत**

**प्रश्नों के उत्तर दीजिए।**

**Answer the questions** (1×4=4)

(i) विप्रः इति पदे 'वि' वर्णः गुरुः अस्ति वा लघुः?

(ii) वसन्ततिलकाछन्दसि प्रथमः वर्णः गुरुः भवति वा लघुः?

(iii) अनुष्टुप् इति पदे कः गणः?

(iv) 'शिखरिणी' छन्दसि प्रतिचरणं कति वर्णाः?

**II.** **अधोलिखितपरिभाषाः पूरयत** (1×3=3)

**निम्नलिखित परिभाषाएँ पूरी कीजिए।**

**Fill in the blanks in the following definitions.**

(i) ------------मालिनी भोगिलोकैः।

(ii) सूर्याश्वैर्यदि................शार्दूलविक्रीडितम्।

(iii) अनन्तरोदीरितलक्ष्मभाजौ..............................

**III.** **अधोलिखितचरणद्वये किं छन्दः?** (½×2=1)

**निम्नलिखित दो चरणों में कौनसा छन्द है?**

**What is the meter in the following two charanas?**

(i) वर्णाश्रमाणां गुरवे स वर्णी,

(ii) विचक्षणः प्रस्तुतमाचचक्षे।।

**IV.** **कस्यचिदेकस्य छन्दसः उदाहरणं लिखत।** (2)

**किसी एक छन्द का उदाहरण लिखिए।**

**Write an example of any one of the following meters.**

शिखरिणी, वंशस्थ

13. **I.** **अलङ्काराणाम् अधोलिखिताः परिभाषाः पूरयत** (1×4=4)

**अलङ्कारों की निम्नलिखित परिभाषाएँ पूरी कीजिए।**

**Complete the following definitions of the figures of speech.**

(i) ................प्रकृतस्य परात्मना।

(ii) ................अनेकार्थाभिधानैः..................... ।

(iii) भवेदर्थान्तरन्यासो................ ।

(iv) ................अनुप्रासः ।

**II.** **कस्यचिदेकस्य अलङ्कारस्य उदाहरणं लिखत** (1x3=3)

**किसी एक अलङ्कार का उदाहरण लिखिए**

**Write an example of any one of the following figures of speech**

रूपकम्, यमकम्

**III.** **अधोलिखितपंक्तिषु के अलङ्काराः?** (1x3=3)

**निम्नलिखित पंक्तियों में कौन कौन से अलङ्कार हैं?**

**Name the figures of speech in the following lines.**

(i) रमते न मरालस्य मानसं मानसं विना।

(ii) शब्दार्थौ सत्कविरिव द्वयं विद्वानपेक्षते।।

(iii) यशसि चाभिरुचिर्व्यसनं श्रुतौ, प्रकृतिसिद्धमिदं हि महात्मनाम्।।